National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 174-175
© 2025 NJHSR
www.sanskritarticle.com

**डा.निराकार सामन्तरायः**
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

**Correspondence:**
**डा.निराकार सामन्तरायः**
पुराणेतिहासविद्याशाखा,
पूर्व शोधछात्र, राष्ट्रीयसंस्कृतविश्व-
विद्यालयः, तिरुपति

# सुसमाजाय पौराणिकी वार्ता

**डा. निराकार सामन्तरायः**

पुराणस्य प्रभावः प्राचीनकालादारभ्य इदानीन्तनकालपर्यन्तं विभाति। पुराणं मानवजातेर्हृदयान्धकार-स्यापाकरणाय सर्वथा मणिमयं प्रकाशकमस्ति। परमतत्वदृष्ट्या पुराणं हि नूनमस्ति श्रद्धेयं शास्त्रम्। पुराणेषु विविधैः प्रकारैः परमं पुरुषार्थमवगन्तुमुपायाः प्रदर्शिताः सन्ति। अद्यत्वे पुराणानां सम्यगध्ययनाभावादेव तत्र निर्मूला अनेके आक्षेपा भवन्ति। गभीरतया तदनुसन्धाने क्रियमाणे तेषामाक्षेपाणामनायासेन निराकरणं जायते।

पुराणं हि हिन्दुजातेः सर्वस्वं भारतीयसंस्कृतेः पोषकं मानवसमाजस्य पथप्रदर्शकमार्यसाहित्यस्य चाधारस्तम्भो विद्यते, येन सर्वविधं धार्मिक-नैतिक-सामाजिक-सद्व्यवहारादीनां सौविध्यमवाप्यते। भारतीयप्राचीनेतिहासस्यान्धकारे युगेऽपि पुराणप्रभया प्रकाशः प्राप्यते। अत एव महर्षिणा याज्ञवल्क्येन विद्यागणनायां पुराणस्य प्राथम्यमुपात्तम्। समाजाय यदि उपकारिणी विधा पुराणं, तर्हि कोऽयं समाजः ? समाजः एकः व्यापकशब्दः वर्तते। यः व्यक्तीनां समूहः, यत्र सांस्कृतिकराजनैतिकादिभिः सर्वे आवद्धाः भवन्ति।

**सुसमाजाय बाधकतत्वानि**

परिदृश्यमाने जगत्यस्मिन् उपासनाविरताः इन्द्रियासक्ताः जनाः कुप्रवृत्तिषु संलग्नाः सन् विनष्टाः भवन्ति। इन्द्रियसन्निकर्षजन्यरिपवः मनसा संयुक्ताः सन् कालुष्यतामुत्पादयन्ति। ते रिपवः भवन्ति बाधकतत्वस्वरूपाः (काम-क्रोध-लोभ-मोह-मद-मात्सर्यादयः)। “सर्वः स्वार्थं समीहते” अनया प्रसिद्धोक्त्या सिद्ध्यति यत् इदानीन्तनकालो जनाः कामादिभिः स्वार्थिनः भूत्वा अन्यान् पीडयन्ति । कलौ दुष्टजनानां कार्याणि कानि भविष्यन्ति ? अधः पुराणाधारितानि प्रमाणानि विद्यन्ते।

**कलौ दुष्टजनानां कार्याणि**

**वामाचाररताः सर्वे मिथ्याकपटसंयुताः।**
**शठाः क्रूरा दाम्भिकाश्च महाहङ्कारसंयुताः।**
**चौराश्च हिंसकाः सर्वे भविष्यति ततः परम्।**
**कन्याविक्रयिणः सर्वे वर्णाश्चत्वार एव च।**
**देववृत्तिं ब्रह्मवृत्तिं वृत्तिं गुरुकुलस्य च।**
**स्वदत्तां परदत्तां वा सर्वमुल्लङ्घयिष्यति॥** (दे.भा-9/8/16, 17,39,42)

अर्थात् जनाः वाममार्गीय-मिथ्याकपटयुक्त-शठ-क्रूर-दाम्भिक-महाहङ्कारयुक्त-चोर-हिंसक-कन्या-विक्रयकारिणः भविष्यन्ति एवञ्च देव-ब्रम-गुरुकुलवृत्तीनां तथा च स्वदत्तां परदत्तां वृत्तिमपि अपहरन्ति। पुनरपि अतीवनष्टशीलप्रवृत्तिविशिष्टाः अन्ववसर्गाः किं कुर्वन्ति ? इति अधः दीयते-

**कन्यकागामिनः केचित्वोचिच्च श्वश्रुगामिनः।**
**केचिद्वधूगामिनश्च केचिद्वै सर्वगामिनः॥**
**भगिनीगामिनः केचित्सपत्नीमातृगामिनः।**
**भ्रातृजायागामिनश्च भविष्यन्ति कलो युगे॥**
**पत्नीनां निर्णयो नास्ति भर्तृणां च कलौ युगे।**
**प्रजानां चैव ग्रामाणां वस्तूनां च विशेषातः॥** (दे.भा-9/8/43-46)

अन्ववसर्गाः वा कामाचारानुज्ञाः जनाः कालावस्मिन् कन्यका-श्वश्रु-वधू-भगिनी-सपत्नीमातृ-भ्रातृजायाभिः सर्वाभिश्च मह स्वमातरं त्यक्त्वा अगम्यागामिनः भविष्यन्ति, प्रजानां ग्रामाणां वस्तूनाञ्च विशेषरूपेण निर्णयः अपि न। इतोऽपि आधिक्यं प्रमाणमपि पुराणग्रन्थेषु दृश्यते।

**स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः।**
**असंम्कृताः क्रियाहीनाः रजसा तमसाऽऽवृताः।**
**प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणयः॥**

(भा.म-12/1/41-42)

दुष्टजनाः स्त्री-गो-बालक-ब्राहमणान् हन्तुं सदैव समुद्यताः भविष्यन्ति, परस्त्रीधनादीनामपहरणार्थं समुत्सुकाः अपि। कारणं परम्परागत-संस्कारविहीनाः, स्वकर्तव्यपराङ्मुखाः रजतमावृताः एवञ्च राजन्यरूपिण्यः म्लेच्छाः प्रजाः भक्षयिष्यन्ति ।

**दाम्पत्येऽभिरुचि हेतुर्मायैव व्यावहारिके।**
**स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि॥** (भा.म/12/2/3)

पतिपत्न्यौ दाम्पत्यजीवने रतिं मुख्यमिति विज्ञाय उभयोर्मध्ये मायावशात् केवलं व्यावहारिकत्वं स्थापयेते। यानि प्रमाणानि उल्लिखितानि तानि अद्यतनीयसमाजे सम्बादपत्रैः घटिततथ्यानि प्रकाश्यन्ते।

**कालुष्यतानिरोधोपायार्थं पौराणिकीवार्ता**

शिष्टाचरणानि एतेभ्यः कुकर्मेभ्यः सुपथं प्रदर्शयन्ति । आचरणशुद्धाय बुद्धेः शुद्धिः परमावश्यकी वर्तते; तदर्थं गुरुमार्गीयशास्त्रशिक्षा अपरिहार्या। शास्त्रेषु साक्षात् लोकोपकारकं पुराणशास्त्रं सदैव आधत्वं विभाति। विषयविषसङ्गाकुलधियः जनाः वहूनि कुकर्माणि कुर्वते। यस्मात् वशात् एतानि कुकर्माणि वर्तन्ते तदर्थं महर्षिणा, श्रीव्यासेन विरच्यते। कलौ भागवती वार्ता भवरोगविनाशिनी।"

(प.पु/उ.ख-/भा.मा/6/97)

अर्थात् भवरोगविनाशाय भागवती वार्ता सुमार्गं दर्शयति।

**श्रीमद्भगवतगीतायां लभ्येते द्वौ श्लोकौ**

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।**
**परित्राणाय साधूर्ना विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥** (गीता-4/7,8)

भगवता श्रीकृष्णेन गीतायां सुसमाजाय सः किं करिष्यतीति प्रसिद्धश्लोकाभ्यां स्पष्टीयते। अर्थात् यदा धर्मस्य ग्लानिर्भवति अधर्मस्योत्थानाञ्च तदा साधूनां परित्राणाय दुष्टानां विनाशाय धर्मसंस्थापनाय च भगवान् धरावतरणं करिष्यतीति अब्रवीत्। भगवान् साक्षात् सच्चिदानन्दस्वरूपः, शास्त्ररूपेण सुसमाजाय उदेति। त्रितापसमूलोपशमनार्थं भगवान् विश्वस्य उत्पत्ति-स्थिति-लयानां मूलहेतुरिति शास्त्रचक्षुषा विज्ञाय तं सर्वे प्रणमन्ति।

स एव सच्चिदानन्दविग्रहः रामायण-गीता-भागवतादिषु ग्रन्थेषु सत्-चित्-आनन्दरूपेण प्रकाशितः। तथैव पुराणसाहित्ये एतादृशः मार्गः प्रदर्शितः येन दुःखं सुखरूपं प्राप्नोति।

**नाम संकीर्तनं यस्य सर्वपापप्रणाशनम्।**
**प्रणामो दुःखरामनस्तं नमामि हरिं परम्॥** (भा/12/13/23)

सर्वदुःस्वविनाशाय सर्वपापप्रणाशनाय नाम संकीर्तयेत्, तं हरिं परंब्रह्म प्रणमेत्। यदि एतादृशं कार्यं न करोति कोऽपि तस्प फलं किम् अधः दीयते।

**कर्मफलम्-**

**"प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः।**
**मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः॥"** ( भा/1/1/10)

अस्मिन् कलियुगे जनाः युगप्रभावात् बिकृतमतिसम्पन्नाः दुष्टकार्यरताः स्वल्पायुषः भवन्ति मन्दाः मन्दभाग्याश्च ।

पुरुषार्थचतुष्टयप्राप्तये भक्तिज्ञानवैराग्याणां स्थापनं भवेयुः। एतदर्थं साक्षात् लोकोपकारकं शास्त्रं पुराणं पठेत् । समाजेऽस्मिन् यदि सर्वे स्वार्थं त्यक्त्वा परार्थाय परमसुखाय च अनुधावितवन्तः भविष्यन्ति तर्हि सुसमाजः नूऱ् भविष्यतीति नास्ति सन्देहस्य लेशावसरः। एतदर्थं ध्रुव- प्रहलाद - कुन्ती-अम्बरीष -द्रौपदी - हनुमान - विदुर-रूक्मिणी - गोपी - अर्जुनादीनाम् उदाहरणानि लभ्यन्ते। एतादृशानि भक्तचरितानि निशम्य पठेयुः, पुनश्च भागवतमहापुराणस्य अवधूतगुरुपाख्यानानि समुचितज्ञानाय अपि । पुराणेषु सर्वेषु कुकर्माणां फलानि मुकर्माणां कलान्यपि विदितानि । सर्वोत्कृष्टमार्गः सत्सङ्गः भवेत् । व्रत-यज्ञ-तीर्थ-नियम-यमादीनामपेक्षया सत्सङ्गः सुसमाजाय मूलमेव वर्तते। तीर्यक्योनयः अतीर्यक्योनयश्च सर्व् देव-दैत्य-यातुधाना- मृगा-खगा- गन्धर्व-अप्सरा-नाग-सिद्धचारण- गुह्यक- भक्त- अभक्ताः सर्वे यदि कुसङ्गं त्यक्त्वा सत्सङ्गं आद्रियन्ते सुकार्यं कर्तुं समर्थाः भविष्यन्ति।

**व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः।**
**यथावरुन्धे सत्सङ्गः सर्वसंगापहो हि माम्॥**
**सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः।**
**गन्धर्वाप्सरसो नागाः सिद्धाश्चारण गुह्यकाः॥** (भा/11/2/3)

सुसमाजाय सुसंस्काराय च सर्वविध हिताय च सत्सङ्गः सदैव अस्माकं कर्तव्यः। अनेन शुद्धबुध्या जनाः सुकार्याय समर्थाः भविष्यन्ति, अनेन धर्मार्थकाममोक्षाः सफलीभूताः अपि।

अन्तिमे भागवते पिङ्गलाबेश्यानार्याः अनुभवज्ञानजन्यवाणी स्पष्टयति-

**आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।**
**यथा सञ्छिन्द्य कान्ताशां सुखं सुष्वाप पिङ्गला॥** (भा/11/8/44)

जगत्यम्मिन् आशा सदैव दुःखस्य कारणरूपा, नैराश्यं सुखस्य कारणरूपं वर्तते । यथैव वेश्यानारी पिङ्गला स्वकामनापूर्तये कष्टं सम्प्राप्य सत्यार्थं ज्ञात्वा कान्ताशां त्यक्तवती, तथैव सत्सुखाय नैराश्यभावनया शास्त्रनिध्येशितमार्गं पालयेत् अनुचरेत् च । सर्वे अनेन कारणेन पिङ्गलात् सुखं प्राप्स्यन्ति ।

**सन्दर्भग्रन्थाः-**

1- पुराणपर्यालोचनम्
2- श्रीमद्भागवतमहापुराणम्
3- श्रीमद्भगवद्गीता
4- श्री देवीभागवतमहापुराणम्
5- श्रीपद्मपुराणम्